श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

# ॥ प्रतिप्रस्थानपद्धतिः पञ्चमी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

# ॥ प्रतिप्रस्थानपद्धतिः पञ्चमी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

प्रशस्ते रामपादाभ्यां पादुके पर्युपास्महे।
आनृशंस्यं ययोरासीत् आश्रितेष्वनवग्रहम् ॥ 5.1 ॥

भृशातुरसहोदरप्रणयखण्डनस्वैरिणा
पदेन किमनेन मे वनमिहावनादिच्छता।
इतीव परिहाय तन्निववृते स्वयं यत् पुरा
पदत्रमिदमाद्रिये धृतजगत्त्रयं रङ्गिणः ॥ 5.2 ॥

दशवदनविनाशं वाञ्छतो यस्य चक्रे
दशरथमनघोक्तिं दण्डकारण्ययात्रा।
स च भरतविमर्दे सत्यसन्धस्त्वयासीत्
रघुपतिपदरक्षे ! राजधानीं प्रयान्त्या ॥ 5.3 ॥

अभ्युपेतविनिवृत्तिसाहसा
देवि ! रङ्गपतिरत्नपादुके।
अत्यशेत भवती महीयसा
पारतन्त्र्यविभवेन मैथिलीम् ॥ 5.4 ॥

अव्याहतां रघुपतेर्वहतः प्रतिज्ञाम्
अंसाधिरोहणरसे विहते धरण्याः।

प्रादान्निवृत्य भवती मणिपादरक्षे !
    स्पर्शं पदेन विगतव्यवधानखेदम् ॥ **5.5** ॥

मन्त्राभिषेकविरहाद्व्रजता विशुद्धिं
    संस्कारवर्जनवशादभिसंस्कृतेन।
मूर्ध्ना निनाय भरतो मणिपादुके ! त्वां
    रामाज्ञया विनिहितामिव राज्यलक्ष्मीम् ॥ **5.6** ॥

रक्षार्थमस्य जगतो मणिपादरक्षे !
    रामस्य पादकमलं समये त्यजन्त्योः।
किं दुष्करं तव विभूतिपरिग्रहो वा
    किं वा विदेहदुहितुः कृपणा दशा सा ॥ **5.7** ॥

सीतासखस्य सहसा चरणारविन्दात्
    भक्त्या नते कृतपदा भरतोत्तमाङ्गे।
आरुह्य नागमभितो भवती वितेने
    मायूरचामरभरं मणिरश्मिजालैः ॥ **5.8** ॥

मूर्ध्ना मुकुन्दपदरक्षिणि ! बिभ्रतस्त्वाम्
    आविर्मदस्य रघुवीरमदावळस्य।
आमोदिभिस्सपदि दानजलप्रवाहैः
    लेभे चिराद्वसुमती रुचिरं विलेपम् ॥ **5.9** ॥

आशाः प्रसाधयितुमम्ब ! तदा भवत्यां
    दैवादकाण्डशरदीव समुत्थितायाम्।
स्तोकावशेषसलिलास्सहसा बभूवुः
    साकेतयौवतविलोचनवारिवाहाः ॥ **5.10** ॥

अन्ते वसन्नचरमस्य कवेस्स योगी
    वन्यान् प्रगृह्य विविधानुपदाविशेषान्।

आतस्थुषीं रघुकुलोचितमौपवाह्यम्
    प्रत्युज्जगाम भवतीं भरतोपनीताम् ॥ **5.11** ॥

मातस्त्वदागमनमङ्गळदर्शिनीनां
    साकेतपक्ष्मळदृशां चटुलाक्षिभृङ्गैः।
जातानि तत्र सहसा मणिपादरक्षे !
    वातायनानि वदनैः शतपत्रितानि ॥ **5.12** ॥

साकेतसीम्नि भवती मणिपादरक्षे !
    माङ्गल्यलाजनिकरैरवकीर्यमाणा।
कीर्तिस्वयंवरपतेर्भरतस्य काले
    वैवाहिकी जननि ! वह्निशिखेव रेजे ॥ **5.13** ॥

छत्रेन्दुमण्डलवती मणिपादुके ! त्वं
    व्याधूतचामरकलापशरप्रसूना।
सद्यो बभूविथ समग्रविकासहेतुः
    साकेतपौरवनितानयनोत्पलानाम् ॥ **5.14** ॥

प्रैक्षन्त वक्त्रैर्मणिपादरक्षे !
    शत्रुञ्जयं शैलमिवाधिरूढाम्।
रामाभिधानप्रतिपन्नहर्षैः
    उत्तानितैरुत्तरकोसलास्त्वाम् ॥ **5.15** ॥

द्रष्टुं तदा राघवपादरक्षे !
    सीतामिव त्वां विनिवर्तमानाम्।
आसन्नयोध्यापुरसुन्दरीणाम्
    औत्सुक्यलोलानि विलोचनानि ॥ **5.16** ॥

आस्थाय तत्र स्फुटबिन्दुनादं
    स्तम्बेरमं तादृशसन्निवेशम्।

अदर्शयस्त्वं पुरमध्यभागे
पादावनि ! त्वत्प्रणवाश्रयत्वम् ॥ **5.17** ॥

दशग्रीवस्तम्बेरमदळनदुर्दान्तहृदये
विहारस्वाच्छन्द्यात् विशति रघुसिंहे वनभुवम्।
स्ववात्सल्यक्रोडीकृतभरतशाबेव भवती
निराबाधां पादावनि ! न विजहौ कोसलगुहाम् ॥ **5.18** ॥

कैकेयीवरदानदुर्दिननिरालोकस्य लोकस्य यत्
त्राणार्थं भरतेन भव्यमनसा साकेतमानीयत।
रामत्यागसहैरसह्यविरहं रङ्गक्षितीन्द्रस्य तत्
पादत्राणमनन्यतन्त्रफणितेरापीडमीडीमहि ॥ **5.19** ॥

समुपस्थिते प्रदोषे सहसा विनिवृत्य चित्रकूटवनात्।
अभजत पुनर्जनपदं वत्सं धेनुरिव पादुके ! भवती ॥ **5.20** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे प्रतिप्रस्थानपद्धतिः पञ्चमी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥